सुखानुभवे सति स्मृत्या तज्जातीयसुखान्तरे तत्साधने वा तृष्णा स रागः सुखमनुशेते विषयीकरोति सुखानुशयीत्यर्थः एवं दुःखानुभवितुः स्मृत्या दुःखे तत्साधने वा यः क्रोधः स द्वेष इत्यर्थः । एवञ्च सुखस्य स्मरणात्मकज्ञानात् सुखे इच्छा नान्येच्छाधीना इति तस्य स्वतःप्रयोजनत्वम् अन्येच्छानधीनेच्छाविषयस्यैव तथात्वात् । तत्साधने तु सुखसाधनत्वज्ञानादेवेच्छा अतस्तस्य गौणप्रयोजनत्वम् । स्मरणात्मकदुःखज्ञानाच्च दुःखे द्वेषः तत्साधने तु तत्साधनत्वज्ञानात् द्वेषः यथाह भाषा० "सुखन्तु जगतामेव काम्यं धर्म्मेण जन्यते । अधर्म्मजन्यं दुःखं स्यात् प्रतिकूलं सचेतसाम् । निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते । इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि । चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा च या भवेत् । तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत् । बलवद्द्विष्टहेतुत्वमतिः स्यात् प्रतिबन्धिका । तदहेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते । द्विष्टसाधनताबुद्धिर्भवेद् द्वेषस्य कारणम्"। इच्छया च तत्साधने प्रवृत्तिः । द्वेषाच्च तत्साधने निवृत्तिः । यत्र सुखनान्तरीयकविधया दुःखमुत्पद्यते तादृशे कर्म्मणि द्विष्टसाधनत्वज्ञाने सत्यपि इच्छातत्कार्य्ययोर्दर्शनात् बलवद्द्विष्टासाधनत्वज्ञानस्यैव इच्छायां प्रवृत्तौ च कारणत्वेन तस्य तन्नान्तरीयकत्वान्न बलवद्द्विष्टत्वम् । अतएव कण्टकिमत्स्यभक्षणादौ सतुषधान्यादिग्रहणे च प्रवृत्तिः । कामुकादेः परदारादिगमने नरकसाधनत्वं विदुषोऽपि प्रवृत्तिस्तु तत्काले ऐहिकसुखापेक्षया कालान्तरभाविनि नरकादौ बलवद्द्वेषाभावेन बलवद्द्विष्टासाधनत्वज्ञानादेवेति न विरोधः ।

तत्र सुखं प्रथमं द्विविधं ज्ञानप्रसादलब्धं ब्रह्मानन्दाद्यपरपर्य्यायं निरतिशयम्, वैषयिकं सातिशयञ्च" तच्च तैत्तिरीयश्रुतौ मनुष्यादारभ्य ब्रह्मपर्य्यन्तानाम् ७१७पृ० प्राग्दर्शितम् सातिशयञ्च सुखं विवेकिनां दुःखमेव । यथोक्तम् विषयतृष्णाराहित्यरूपोपरतिस्वरूपतुष्टिप्रदर्शने" सां०कौ०। "अर्ज्जनरक्षणक्षयभोगहिंसादोषदर्शनहेतुजन्मान उपरमाः पञ्च भवन्ति । तथा हि सेवादयोधनोपार्जनोपायास्ते च सेवकादीन् दुःखाकुर्वन्ति । दृप्यद्दुरीश्वरद्वाःस्थहस्तदत्तचखड्गाङ्कचन्द्रजां वेदनां भावयन् प्राज्ञः कः सेवासु प्रसज्जते ? । एवमन्येऽप्यर्ज्जनोपाया दुःखा इति विषयोपरमे या तुष्टिः सैषा पारमुच्यते । तथार्जितं धनं राजैकागारिकाग्निजलौघादिभ्योविनङ्क्ष्यतीति तद्रक्षणे महद्दुःखमिति भावयतोविषयोपरमे या तुष्टिः सा द्वितीया सुपारमुच्यते । तथा महतायासेनार्जितं धनं भुज्यमानं क्षीयते इति तत्क्षयं भावयतोविषयोपरमे या तुष्टिः सा तृतीया पारपारमुच्यते । एवं शब्दादिभोगाभ्यासाद्वर्द्धन्ते कामास्ते च विषयाप्राप्तौ कामिनं दुःखयन्तीति भोगदोषं भावयतो विषयोपरमे या तुष्टिः सा चतुर्थी अनुत्तमाम्भ उच्यते । एवं नानुपहत्य भूतानि विषयोपभोगः सम्भवतीति हिंसादोषदर्शनाद्विषयोपरमे या तुष्टिः सा पञ्चमी उत्तमाम्भ उच्यते" । "परिणाम तापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः" पात०सूत्रे चोक्तम् । अयमर्थः परिणामोऽन्यथाभावः तापः वर्त्तमानः, संस्कारोभूतः एतान्येव दुःखानि तैरिति विग्रहः तथा च विषयसुखभोगात् कामानलो वर्द्धते "न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते" इति भारतोक्तेः तद्वृद्धौ च सत्यां कदाचित् काम्यालाभे दुःखमवश्यं भावि कदाचिद्लाभेऽपि कुतश्चिद्भोगसङ्कोचे दुःखम् ततः सङ्कोचके द्वेषः ततः कामद्वेषाभ्यां पापस्योपचयात् दुःखमवश्यं भावि । असङ्कोचे व्याधिः पापञ्च ततोदुःखम् एवं भोगस्य परिणामदुःखता । तथा सुखभोगस्य तत्साधनस्य नाशे तापः अनुतापः स च दुःखमेवेति तस्य तापदुःखता । तथा भोगनाशेऽपि तत्संस्कारः तिष्ठत्येव सति तस्मिन् तज्जातीये पुनः रागः रागे च पुण्यापुण्यसाधनावश्यम्भावः ततः पुनः सुखदुःखभोगः ततः पुनः संस्कार इत्यनन्तदुःखसन्ततिः तथा च यथा भोगनाशे न संस्कारो भवेत् तथा यतितव्यमिति अतएवोक्तम् "असक्तः सुखमन्वभूत्" सर्व्वमेव विषयभोगसाधनं विषयजन्यं सुखं च दुःखपक्षे निक्षेप्तव्यम् । तत्र हेतुः गुणवृत्तिविपर्य्ययादिति गुणानां चित्तात्मना परिणतानां सत्त्वरजस्तमसां वृत्तीनां सुखदुःखमोहानां विरोधात् परस्पराभिभाव्याभिभावकत्वरूपविरोधात् इति । तथा च त्रिगुणचित्तस्य यदा रजस्तमसी सत्त्वात् किञ्चिदूने भवतः तदा ते मिथुनीभूय सत्त्वाभिभवाभिमुखे भवतः । तदानीञ्च तमसा सत्त्वापिधाने कृते रजश्चैश्वर्य्यं कामयमानेन विषयः प्रियो भवति तदा तेन सत्त्वाच्छादनेन चित्तं विक्षिप्तं भवति । यदा तु तमः प्रधानं तदा चित्तं मूढं भवति सत्त्वोद्रेके तु सुखम् इत्येवमेकस्यैव चित्तस्य सत्त्वादिकारणोद्रेकभेदेन सुखदुःखादिरूपता ।

सुखादिकञ्च अन्तःकरणधर्मः धर्म्माधर्म्मफलत्वात् "शा-